# स्वर्णाकर्षण भैरव स्तोत्रम्

ॐ अस्य श्री स्वर्णाकर्षण भैरव स्तोत्र महामन्त्रस्य
ब्रह्म ऋषिः अनुष्टुप छन्दः श्री स्वर्णाकर्षण भैरवो देवता
ह्रीं बीजं क्लीं शक्तिः सः कीलकं
मम दारिद्य नाशार्थे पाठे विनियोगः ॥

**ऋष्यादि न्यासः –**

ब्रह्मर्षये नमः शिरसि ।
अनुष्टुप छन्दसे नमः मुखे ।
स्वर्णाकर्षण भैरवाय नमः हृदि ।
ह्रीं बीजाय नमः गुह्ये ।
क्लीं शक्तये नमः पादयो ।
सः कीलकाय नमः नाभौ ।
विनियोगाय नमः सर्वाङ्गे ।
ह्रां ह्रीं ह्रूं इति कर षडङ्गन्यासः ॥

**ध्यानम् –**

पारिजातद्रुम कान्तारे स्थिते माणिक्य मण्डपे
सिंहासन गतं वन्दे भैरवं स्वर्णदायकम् ।
गाङ्गेय पात्रं डमरूं त्रिशूलं वरं करः संदधतं त्रिनेत्रं
देव्यायुतं तप्तस्वर्णवर्ण स्वर्णाकर्षण भैरवं आश्रयामि ॥

**मन्त्रः –**

ॐ ऐं ह्रीं श्रीं ऐं श्रीं आपद् उद्धारणाय ह्रां ह्रीं ह्रूं अजामल वद्धाय लोकेश्वराय स्वर्णाकर्षण भैरवाय मम दारिद्य विद्वेषणाय महाभैरवाय नमः श्रीं ह्रीं ऐं ।

स्तोत्र –

ॐ नमस्ते भैरवाय ब्रह्म विष्णु शिवात्मने।
नमः त्रैलोक्य वन्द्याय वरदाय वरात्मने ॥ 1 ॥

रत्नसिंहासनस्थाय दिव्याभरण शोभिने ।
दिव्यमाल्य विभूषाय नमस्ते दिव्यमूर्तये ॥ 2 ॥

नमस्ते अनेक हस्ताय अनेक शिरसे नमः ।
नमस्ते अनेक नेत्राय अनेक विभवे नमः ॥ 3 ॥

नमस्ते अनेक कण्ठाय अनेकांसाय ते नमः ।
नमस्ते अनेक पार्श्वाय नमस्ते दिव्य तेजसे ॥ 4 ॥

अनेकायुध युक्ताय अनेक सुर सेविने ।
अनेक गुण युक्ताय महादेवाय ते नमः ॥ 5 ॥

नमो दारिद्र्यकालाय महासंपत् प्रदायिने ।
श्री भैरवी संयुक्ताय त्रिलोकेशाय ते नमः ॥ 6 ॥

दिगंबर नमस्तुभ्यं दिव्याङ्गाय नमो नमः ।
नमोऽस्तु दैत्यकालाय पापकालाय ते नमः ॥ 7 ॥

सर्वज्ञाय नमस्तुभ्यं नमस्ते दिव्य चक्षुषे ।
अजिताय नमस्तुभ्यं जितमित्राय ते नमः ॥ 8 ॥

नमस्ते रुद्ररूपाय महावीराय ते नमः ।
नमोऽस्त्वनन्त वीर्याय महाघोराय ते नमः ॥ 9 ॥

नमस्ते घोर घोराय विश्वघोराय ते नमः ।
नमः उग्राय शान्ताय भक्तानां शान्तिदायिने ॥ 10 ॥

गुरवे सर्वलोकानां नमः प्रणव रूपिणे ।
नमस्ते वाग्भवाख्याय दीर्घकामाय ते नमः ॥ 11 ॥

नमस्ते कामराजाय योषित कामाय ते नमः ।
दीर्घमाया स्वरूपाय महामायाय ते नमः ॥ 12 ॥

सृष्टिमाया स्वरूपाय निसर्ग समयाय ते ।
सुरलोक सुपूज्याय आपदुद्धारणाय च ॥ 13 ॥

नमो नमो भैरवाय महादारिद्र्य नाशिने ।
उन्मूलने कर्मठाय अलक्ष्म्याः सर्वदा नमः ॥ 14 ॥

नमो अजामलवद्धाय नमो लोकेश्वराय ते ।
स्वर्णाकर्षण शीलाय भैरवाय नमो नमः ॥ 15 ॥

मम दारिद्र्य विद्वेषणाय लक्ष्याय ते नमः ।
नमो लोकत्रयेशाय स्वानन्द निहिताय ते ॥ 16 ॥

नमः श्रीबीजरूपाय सर्वकाम प्रदायिने ।
नमो महाभैरवाय श्री भैरव नमो नमः ॥ 17 ॥

धनाध्यक्ष नमस्तुभ्यं शरण्याय नमो नमः ।
नमः प्रसन्न आदिदेवाय ते नमः ॥ 18 ॥

नमस्ते मन्त्ररूपाय नमस्ते मन्त्ररूपिणे ।
नमस्ते स्वर्णरूपाय सुवर्णाय नमो नमः ॥ 19 ॥

नमः सुवर्ण वर्णाय महापुण्याय ते नमः ।
नमः शुद्धाय बुद्धाय नमः संसार तारिणे ॥ 20 ॥

नमो देवाय गुह्याय प्रचलाय नमो नमः ।
नमस्ते बालरूपाय परेषां बलनाशिने ॥ 21 ॥

नमस्ते स्वर्णसंस्थाय नमो भूतलवासिने ।
नमः पातालवासाय अनाधाराय ते नमः ॥ 22 ॥

नमो नमस्ते शान्ताय अनन्ताय नमो नमः ।
द्विभुजाय नमस्तुभ्यं भुजत्रय सुशोभिने ॥ 23 ॥

नमोऽनमादि सिद्धाय स्वर्णहस्ताय ते नमः ।
पूर्णचन्द्र प्रतीकाश वदनांभोज शोभिने ॥ 24 ॥

नमस्तेऽस्तु स्वरूपाय स्वर्णालङ्कार शोभिने ।
नमः स्वर्णाकर्षणाय स्वर्णाभाय नमो नमः ॥ 25 ॥

नमस्ते स्वर्णकण्ठाय स्वर्णाभ अम्बरधारिणे ।
स्वर्णसिंहासनस्थाय स्वर्णपादाय ते नमः ॥ 26 ॥

नमः स्वर्णाभपादाय स्वर्णकाञ्ची सुशोभिने ।
नमस्ते स्वर्णजङ्घाय भक्तकामदुधात्मने ॥ 27 ॥

नमस्ते स्वर्णभक्ताय कल्पवृक्ष स्वरूपिणे ।
चिन्तामणि स्वरूपाय नमो ब्रह्मादि सेविने ॥ 28 ॥

कल्पद्रुमाद्यः संस्थाय बहुस्वर्ण प्रदायिने ।
नमो हेमाकर्षणाय भैरवाय नमो नमः ॥ 29 ॥

स्तवेनानेन संतुष्टो भवलोकेश भैरव ।
पश्य मां करुणादृष्ट्या शरणागत वत्सल ॥ 30 ॥

श्री महाभैरवस्य इदं स्तोत्रमुक्तं सुदुर्लभम् ।
मन्त्रात्मकं महापुण्यं सर्वैश्वर्य प्रदायकम् ॥ 31 ॥

यः पठेन्नित्यं एकाग्रं पातकै स प्रमुच्यते ।
लभते महतीं लक्ष्मीं अष्टैश्वर्यं अवाप्नुयात् ॥ 32 ॥

चिन्तामणिं अवाप्नोति धेनु कल्पतरुं ध्रुवम् ।
स्वर्णराशिं अवाप्नोति शीघ्रमेव न संशयः ॥ 33 ॥

त्रिसन्ध्यं यः पठेत्स्तोत्रं दशावृत्या नरोत्तमः ।
स्वप्ने श्री भैरवः तस्य साक्षात् भूत्वा जगद्गुरुः ॥ 34 ॥

स्वर्णराशि ददात्यस्यै तत्क्षणं नात्र संशयः ।
अष्टावृत्या पठेत् यस्तु सन्ध्यायां वा नरोत्तमम् ॥ 35 ॥

लभते सकलान् कामान् सप्ताहान् नात्र संशयः ।
सर्वदः यः पठेस्तोत्रं भैरवस्य महात्मनाः ॥ 36 ॥

लोकत्रयं वशीकुर्यात् अचलां लक्ष्मीं अवाप्नुयात् ।
नभयं विद्यते क्वापि विषभूतादि संभवम् ॥ 37 ॥

म्रियते शत्रवः तस्य अलक्ष्मी नशं आप्नुयात् ।
अक्षयं लभते सौख्यं सर्वदा मानवोत्तमः ॥ 38 ॥

अष्ट पञ्चात् वर्णाढ्यो मन्त्रराजः प्रकीर्तितः ।
दारिद्य दुःखशमनः स्वर्णाकर्षण कारकः ॥ 39 ॥

य एन सञ्चयेत् धीमान् स्तोत्रं वा प्रपठेत् सदा ।
महाभैरव सायुज्यं स अनन्तकाले लभेत् ध्रुवम् ॥ 40 ॥

॥ इति रुद्रयामल तन्त्रे स्वर्णाकर्षण भैरव स्तोत्रं संपूर्णम् ॥